# Shri Tarashatanama Stotram

# શ્રીતારાશતનામસ્તોત્રમ્

## Document Information

Text title : tArAshatanAmastotram 3

File name : tArAshatanAmastotram3.itx

Category : aShTottarashatanAma, devii, stotra, devI, dashamahAvidyA

Location : doc_devii

Proofread by : Rajesh Thyagarajan

Description-comments : Kalivilasatantra

Latest update : March 23, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 23, 2024

*sanskritdocuments.org*

# શ્રીતારાશતનામસ્તોત્રમ્

(અથ શ્રીકાલીવિલાસતન્ત્રે દ્વાદશપટલઃ ।)

શ્રીદેવ્યુવાચ ।

શ્રુણુ પાર્વતિ વક્ષ્યામિ શતનામ શુભાનિ ચ ॥ ૧॥

અસ્ય શ્રીશતનામ સ્તોત્રસ્ય શ્રીસદાશિવ ઋષિર્ગાયત્રોચ્છન્દઃ
શ્રીતારાદેવતા ચતુર્વર્ગસિદ્ધયે વિનિયોગઃ ॥

ૐ અદ્વૈતરૂપિણી આદ્યા અસિતા અણિમા તથા ।
અમ્બિકા ચાપરા ચૈવ અપર્ણા અલિનીતિ ચ ॥ ૨॥

અલમ્બુષા અઘોરા ચ અક્રૂરા ઘોરરૂપિણી ।
શોભા ચ સુખદા સત્યા સદા સન્તોષકારિણી ॥ ૩॥

સીમન્તિની ઇડા ચૈવ અલઙ્ગ પિઙ્ગલા તથા ।
દલિતાઞ્જનસઙ્કાશા તારિણી તરુણેક્ષણા ॥ ૪॥

તાપસી તપનારાધ્યા તારા ચ તરલેક્ષણ ।
તૂરીયા તીર્થરૂપા ચ કારિણી રાગરૂપિણી ॥ ૫॥

વિષ્ણુશક્તિઃ સાદારાધ્યા સર્વશક્તિઃ સદાર્ચિતા ।
મહેશશક્તિર્માહેશી નાનામુણિગણાર્ચિતા ॥ ૬॥

રાગિણી રેણુકારમ્યા રક્તપદ્મદલેક્ષણા ।
રામશક્તી રામપૂજ્યા નિત્યા શ્રીરામચર્ચિતા ॥ ૭॥

રત્નરઙ્ગા રણાધ્યક્ષા રણધીરા રણાગ્રણીઃ ।
કૃષ્ણવર્ણા કૃષ્ણપૂજ્યા કૃષ્ણશક્તિઃ કરાલિની ॥ ૮॥

ધનુર્ઈરા ચ ધાનુષ્કો ધન્યા ધર્મપ્રદાયિની ।
કલુષઘ્ના પાપહરા પાપારિઃ પાપનાશિની ॥ ૮॥

પાપરૂપા ચ નિષ્પાપા અકલઙ્કા કલઙ્કિનો ।

કલઙ્કનાશિની કાલી કલિકલ્મષનાશિની ॥ ૧૦॥

ગઙ્ગા ચ યમુના ચૈવ તથા ગોદાવરીતિ ચ ।
નર્મન્દા સિન્ધુરૂપા ચ કાવેરો પુસ્કરા તથા ॥ ૧૧॥

સુન્દરી ભૈરવી ભવ્યા માતઙ્ગી વગલામુખી ।
કૈલાસવાસિની નિત્યા કાલરાત્રિઃ કરાલિકા ॥ ૧૨॥

કાશીપ્રયાગરૂપા ચ કૌમારી કૌષિકી તથા ।
ક્રોધરૂપા ચ અક્રોધા ખેલા હેલા હલાહલા ॥ ૧૩॥

શતનામ ચ તે ભક્ત્યા તારાયાઃ પરિકીર્ત્તિતમ્ ।
અષ્ટોત્તરશતં જપ્ત્વા દશધાવા વરાનને ॥ ૧૪॥

તતઃ સ્તવં પઠિત્વા વૈ સર્વસિદ્ધીશ્વરો ભવેત્ ।
ત્રિસન્ધ્યં યઃ પઠેન્નિત્યં કલિકાલસ્ય સમ્મતમ્ ॥ ૧૫॥

અષ્ટસિદ્ધીશ્વરો ભૂત્વા વિહરેત્ ક્ષિતિમણ્ડલે ।
પૂજાકાલે નિશીથે વા પઠિત્વામુક્તિમાપ્નુયાત્ ॥ ૧૬॥

ઇતિ શ્રીકાલીવિલાસતન્ત્રે શ્રીતારાશતનામસ્તોત્રં સમાપ્તમ્ ।
ૐ તત્સદિત્યાદિ ।

ઇતિ શ્રીકાલીવિલાસતન્ત્રે દ્વાદશપટલઃ સમાપ્તઃ ।

Proofread by Rajesh Thyagarajan

*Shri Tarashatanama Stotram*

pdf was typeset on March 23, 2024

Please send corrections to *sanskrit@cheerful.com*